प्रश्न 1. वचनानुसारं रिक्तस्थानानि पूरयत–(वचनानुसार रिक्तस्थान भरिए–)

	एकवचनम्	द्विवचनम्	बहुवचनम्
यथा–	मन्दिरे	मन्दिरयोः	मन्दिरेषु
	असवरे	.....	.....
	.....	स्थलयोः	.....
	.....	.....	दिवसेषु
	क्षेत्रे	.....	.....
	.....	व्यजनयोः	.....
	.....	.....	पुष्पेषु

उत्तरम्–

एकवचनम्	**द्विवचनम्**	**बहुवचनम्**
अवसरे	**अवसरयोः**	**अवसरेषु**
स्थले	स्थलयोः	**स्थलेषु**
दिवसे	**दिवसयोः**	दिवसेषु
क्षेत्रे	**क्षेत्रयोः**	**क्षेत्रेषु**
व्यजने	व्यजनयोः	**व्यजनेषु**
पुष्पे	**पुष्पयोः**	पुष्पेषु

प्रश्न 2. कोष्ठकेषु प्रदत्तशब्देषु समुचितपदं चित्वा रिक्तस्थानानि पूरयत–

(कोष्ठकों में दिए गए शब्दों में उचित पद को चुनकर रिक्तस्थानों की पूर्ति कीजिए–)

(क) ..... बहवः उत्सवाः भवन्ति। (भारतम्/भारते)

(ख) ..... मीनाः वसन्ति। (सरोवरे/सरोवरात्)

(ग) जनाः ..... पुष्पाणि अर्पयन्ति। (मन्दिरेण/मन्दिरे)

(घ) खगाः ..... निवसन्ति। (नीडानि/नीडेषु)

(ङ) छात्राः ..... प्रयोगं कुर्वन्ति। (प्रयोगशालायाम्/प्रयोगशालायाः)

(च) ..... पुष्पाणि विकसन्ति। (उद्यानस्य/उद्याने)

उत्तरम्–(क) **भारते** बहवः उत्सवाः भवन्ति।

(ख) **सरोवरे** मीनाः वसन्ति।

(ग) जनाः **मन्दिरे** पुष्पाणि अर्पयन्ति।

(घ) खगाः **नीडेषु** निवसन्ति।

(ङ) छात्राः **प्रयोगशालायाम्** प्रयोगं कुर्वन्ति।

(च) **उद्याने** पुष्पाणि विकसन्ति।

प्रश्न 3. अधोलिखितानि पदानि आधृत्य सार्थकानि वाक्यानि रचयत–

(निम्नलिखित पदों पर आधारित सार्थक वाक्यों की रचना कीजिए–)

वानराः	वनेषु	तरन्ति
सिंहाः	वृक्षेषु	नृत्यन्ति
मयूराः	जले	उत्पतन्ति
मत्स्याः	आकाशे	गर्जन्ति
खगाः	उद्याने	कूर्दन्ति।

उत्तरम्– वानराः वृक्षेषु कूर्दन्ति।
सिंहाः वनेषु गर्जन्ति।
मयूराः उद्याने नृत्यन्ति।
मत्स्याः जले तरन्ति।
खगाः आकाशे उत्पतन्ति।

प्रश्न 4. प्रश्नानाम् उत्तराणि लिखत–
(प्रश्नों के उत्तर लिखिए–)

(क) जनाः पुष्पव्यजनानि कुत्र अर्पयन्ति?
उत्तरम्– जनाः पुष्पव्यजनानि बख्तियारकाकी इत्यस्य समाधिस्थले अर्पयन्ति।

(ख) पुष्पोत्सवस्य आयोजनं कदा भवति?
उत्तरम्– पुष्पोत्सवस्य आयोजनं अक्टूबरमासे भवति।

(ग) अस्माकं भारतदेशः कीदृशः अस्ति?
उत्तरम्– अस्माकं भारतदेशः उत्सवप्रियः अस्ति।

(घ) पुष्पोत्सवः केन नाम्ना प्रसिद्धः अस्ति?
उत्तरम्– पुष्पोत्सवः 'फूलवालों की सैर' इति नाम्ना प्रसिद्धः अस्ति।

(ङ) मेहरौलीक्षेत्रे कस्याः मन्दिरं कस्य समाधिस्थलञ्च अस्ति?
उत्तरम्– मेहरौलीक्षेत्रे योगमायामन्दिरं बख्तियारकाकी इत्यस्य समाधिस्थलञ्च अस्ति।

प्रश्न 5. कोष्ठकेषु दत्तेषु शब्देषु उचितां विभक्तिं प्रयुज्य वाक्यानि पूरयत–
(कोष्ठकों में दिए गए शब्दों में उचित विभक्ति का प्रयोग करके वाक्यपूर्ति कीजिए–)
यथा–**सरोवरे** मीनाः सन्ति। (सरोवर)
(क) ..... कच्छपाः भ्रमन्ति। (तडाग)
(ख) ..... सैनिकाः सन्ति। (शिविर)
(ग) यानानि ..... चलन्ति। (राजमार्ग)
(घ) ..... रत्नानि सन्ति। (धरा)
(ङ) बालाः ..... क्रीडन्ति। (क्रीडाक्षेत्र)
उत्तरम्– (क) **तडागे** कच्छपाः भ्रमन्ति।
(ख) **शिविरे** सैनिकाः सन्ति।
(ग) यानानि **राजमार्गे** चलन्ति।
(घ) **धरायां** रत्नानि सन्ति।
(ङ) बालाः **क्रीडाक्षेत्रे** क्रीडन्ति।

प्रश्न 6. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत–
(मंजूषा से पदों को चुनकर रिक्त स्थानों की पूर्ति कीजिए–)

पुष्पेषु	गङ्गायाम्	विद्यालये	वृक्षयोः	उद्यानेषु

(क) वयं ..... पठामः।
(ख) जनाः ..... भ्रमन्ति।
(ग) ..... नौकाः सन्ति।
(घ) ..... भ्रमराः गुञ्जन्ति।
(ङ) ..... फलानि पक्वानि सन्ति।
उत्तरम्– (क) वयं **विद्यालये** पठामः।
(ख) जनाः **उद्यानेषु** भ्रमन्ति।
(ग) **गङ्गायाम्** नौकाः सन्ति।
(घ) **पुष्पेषु** भ्रमराः गुञ्जन्ति।
(ङ) **वृक्षयोः** फलानि पक्वानि सन्ति।